International Journal of Advanced Academic Studies 2021; 3(3): 184-191




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2021; 3(3): 184-191
Received: 10-05-2021
Accepted: 12-06-2021

**Uttam Majhi**
Ph.D. Research Scholar,
Department of Sanskrit,
Pali & Prakrit, Visva-Bharati,
Santiniketan, West Bengal,
India

**Corresponding Author:**
**Uttam Majhi**
Ph.D. Research Scholar,
Department of Sanskrit,
Pali & Prakrit, Visva-Bharati,
Santiniketan, West Bengal,
India

# एकादेशविषये पाणिनीयकातन्त्रव्याकरणयोः तुलनात्मकमध्ययनम्

**Uttam Majhi**

**शोधसारः**

श्रीमता पाणिनिमुनिना तदीयाष्टाध्यायीग्रन्थे एकादेशसन्धिं निरूपयितुं ‘एकः पूर्वपरयोः’ (अष्टाध्यायी, अ०६/१/८४) इति सूत्रं प्रणीतम् । अधिकारोऽयम्, ‘ऋत उत्’ (अ०६/१/१११) इति यावत्। तत्र पर्यन्तं यद् वक्ष्यति तत्र पूर्वपरयोः स्थाने एकादेशो भवति इति वेदितव्यम् । अष्टाध्यायीग्रन्थे सन्धिविषये पञ्चविध एकादेशः परिलक्ष्यते-१.गुणैकादेशः, यथा- उप + इन्द्रः = उपेन्द्रः । २.वृद्धिरेकादेशः, यथा- कृष्ण + एकत्वम् = कृष्णैकत्वम् । ३.पररूपैकादेशः, यथा- प्र + एजते = प्रेजते। ४.दीर्घैकादेशः, यथा- दैत्य + अरिः = दैत्यारिः । ५.पूर्वरूपैकादेशः, यथा- हरे + अव = हरेऽव। परन्तु कातन्त्रव्याकरणे एतादृश एकादेशो न उपलभ्यते। कातन्त्रव्याकरणे अस्मिन् विषये पूर्ववर्णे आदेशः परवर्णस्य लोपो विधीयते । अत उभयोः व्याकरणयोः सूत्राणां मध्ये सादृश्यो वैसादृश्य अस्ति वा इति प्रश्नः सर्वथा सम्भूयत एव । प्रभृतिविषयणामुपरि तुलनात्मकमध्ययनमस्य शोधप्रबन्धस्य प्रमुखोद्देश्यः ।

**कुञ्चीशब्दाः** गुणैकादेशः, वृद्धिरेकादेशः, पररूपैकादेशः, दीर्घैकादेशः, पूर्वरूपैकादेशः

## प्रस्तावना

पाणिनिमुनिना ‘एकः पूर्वपरयोः’ (अ०६/१/८४) इति पदद्वयात्मकमधिकारसूत्रमिदं प्रणीतम्। सूत्रमिदमुत्तरत्रानुवृत्तिर्भवति । इत आरभ्य ‘ख्यत्यात्परस्य’ (अ०६/१/११२) इति सूत्रात् प्राक् अयमधिकारः । अस्मिन्नधिकारे विधीयमान आदेशः पूर्वपरयोः स्थाने एक एव कर्तव्यः । पाणिनीयव्याकरणे एकादेशसन्धिं निरूपयितुं पञ्चविध एकादेशः कृतः, यथा- गुणैकादेशः, वृद्धिरेकादेशः, पररूपैकादेशः, दीर्घैकादेशः, पूर्वरूपैकादेशः । अत्र सर्वत्र विधीयमान आदेशः पूर्वपरयोः द्वयोः स्थाने एक एव भवति। अपि च पाणिनीयव्याकरणे गुण-वृद्ध्यादि[1] कृत्रिमसंज्ञा कृता । परवर्तीकाले अपाणिनीयव्याकरणेषु शर्ववर्मना रचितं कातन्त्रव्याकरणे गुण-वृद्ध्यादि संज्ञा न प्राप्यते । अतः सारल्यार्थं गुणादि शब्दाः सूत्रेऽपि प्रयोगो न कृतः । पाणिनिव्याकरणे उल्लिखितः पञ्चविध एकादेशः कातन्त्रव्याकरणे अन्यप्रकारेण समर्थितः । गुणादि एकादेशो विषयाणामुपरि पाणिनीयकातन्त्रव्याकरणयोः तुलनात्मकमालोचनं करिष्यते ।

## गुणैकादेशः

गुणैकादेशविषये पाणिनिमुनिना सूत्रं प्रणीतम्- ‘आद् गुणः’(अ०६/१/८७) । आद् पञ्चम्यन्तम्, गुणः प्रथमान्तम्, द्विपदमिदं सूत्रम्। ‘इको यणचि’ (अ०६/१/७७) सूत्रात्

---

[1] अदेङ् गुणः(अ०१/१/२), वृद्धिरादैच्(अ०१/१/१)

'अचि' इत्यनुवर्तते, 'एकः पूर्वपरयोः' (अ०६/१/८४) इत्यधिकृतम्। अतः सूत्रार्थो भवति- 'अवर्णान्तात्परो योऽच्, अचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णाचोः स्थाने एको गुण आदेशो भवति।'[2] उदाहरणं यथा- 'रमा + ईशः' इति स्थिते 'अदेङ्गुणः' (अ०१/१/८७) 'स्थानेऽन्तरतमः' (अ०१/१/५०) इतिसूत्रद्वयसहकारेण 'आद् गुणः' (अ०६/१/८७) इत्यनेन अकारस्य ईकारस्य च स्थाने कण्ठतालुस्थानकयोः गुणैकादेशे एकारे 'रमेशः' इति पदं सिध्यति । गङ्गा + उदकम् इति स्थिते 'अदेङ्गुणः' (अ०१/१/८७) 'स्थानेऽन्तरतमः' (अ०१/१/५०) इतिसूत्रद्वयसहकारेण 'आद् गुणः' (अ०६/१/८७) इत्यनेन आकारस्य उकारस्य च स्थाने कण्ठोष्ठस्थानकयोः गुणैकादेशे ओकारे 'गङ्गोदकम्' इति पदं सिद्धम्। कृष्णर्द्धिरित्यत्र कृष्ण + ऋद्धिरिति स्थिते 'आद् गुणः' (अ०६/१/८७) इत्यनेन अकारस्य ऋकारस्य च स्थाने गुणैकादेशः प्राप्तः। परन्तु अकार ऋकारश्चेति द्वौ स्थानिनौ, त्रयोरादेशाः गुणवर्णाः (अ,ए,ओ) प्रसक्ताः । एवं तवल्कार इत्यत्र 'तवल + लृकारः' स्थिते 'आद् गुणः' (अ०६/१/८७) इत्यनेन अकारस्य लृकारस्य च स्थाने गुणैकादेशः प्राप्तः। अत्रैव अकार ऋकारश्चेति द्वौ स्थानिनौ, त्रयोरादेशाः गुणवर्णाः (अ,ए,ओ) प्रसक्ताः । परन्तु अकाराद् ऋकारे परे, लृकारे वा परे ऋकारलृकारयोस्तुल्यः कोऽपि गुणवर्णो नास्ति । अतः कतमो गुणवर्णो भवतीत्याकाङ्क्षा। 'उरण् रपरः' (अ०१/१/५१) इत्यनेन ऋलृ स्थानीयोऽण् रप्रत्याहारपरः सन्नेव प्रवर्तते। अतः "त्रिषु गुणेषु प्रसज्यमानेषु अकारस्य अणो रेफलकारशिरस्कतया तस्य अर् अल् इत्येवमात्मकस्य अकारांशे स्थानिभूतेन अकारेण, रेफांशे ऋकारेण, लकारांशे लृकारेण च स्थानसाम्यादकारऋकारयोः स्थाने अरेव भवति, अकारलृकारयोः स्थाने अलेव भवति। एकारौकारौ तु गुणौ न भवत एव, तयोः ऋकारेण लृकारेण च स्थानसाम्याभावादित्यर्थः।"[3]

कातन्त्रव्याकरणे अस्मिन् विषये पृथक् चत्वारि सूत्राणि कृतानि। प्रथमसूत्रम्- 'अवर्ण इवर्णे ए' (*कातन्त्रव्याकरणम्*, का०व्या०१/२/२)। अत्र 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या०१/२/१) इत्यतः 'परश्च लोपम्' इति अनुवर्तते । अतः सूत्रस्य अर्थो भवति- अवर्णात् इवर्णे ईवर्णे वा परे एकारो भवति परश्च लोपमापद्यते । यथा- तव + इहा इति स्थिते वकारोत्तरवर्ती अकारेण सह 'इहा' शब्दस्य इकारं समेत्य वकारोत्तरवर्ती अकारस्य एकारो भवति परस्य इकारस्य च लोपे तवेहा इति रूपं सिध्यति । अनुरूपेण सा + इयम् = सेयम् इति रूपं सिध्यति। सूत्रे वर्णग्रहणं किमर्थम्? वृत्तिकारेण उक्तम्- "वर्णग्रहणे सवर्णग्रहणम्"[4] अस्मिन् विषये त्रिलोचनेन स्पष्टं कृतम्- "वर्णोशब्दोऽयं स्वभावात् समानेभ्यः श्रुतो यस्य वर्णस्य येन वर्णेन सह सवर्णसंज्ञा तयोः समुदायमाह । एतेन यथासंख्यमपि निरस्तरं भवति । न ह्यवर्णादिशब्दो ह्रस्वदीर्घक्रमेण व्यवस्थितं वर्णमाह । किन्तर्हि सवर्णव्यवहारश्च व्यतिक्रमेणापि निश्चित इति कुतो यथासंख्यम्। अत एव ह्रस्वस्य दीर्घस्य च ह्रस्वे दीर्घे च दर्शितम् ।"[5] 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या०१/२/१) इति सूत्रात् चकारस्य अनुवृत्तेः किं प्रयोजनम् ? वृत्तिकारेण उक्तम् "चकाराधिकारोऽनुक्तसमुच्चयार्थः, तेन क्वचित् पूर्वोऽपि लुप्यते ।"[6] अतो हल + ईषा, लाङ्गल + ईषा इत्यत्र लकारोत्तरवर्त्ती अकारस्य लोपे हलीषा, लाङ्गलीषा प्रभृतिरूपाणि सिध्यति। मनस् + ईषा इति स्थिते नकारोत्तररर्ती अकारस्य लोपः परन्तु सकारस्य लोपः कथं भवेत्? चकारस्यानुक्तसमुच्चयार्थत्वात् लोकोपचाराद्वा सकारस्य लोपे मनीषा इति पदं सिध्यति ।[7]

कातन्त्रव्याकरणे अवर्ण उवर्णे ओकारः प्रयोगार्थं द्वितीयसूत्रं कृतम्- 'उवर्णे ओ' (का०व्या०१/२/३)। अस्मिन् सूत्रे पूर्ववर्ती 'अवर्ण इवर्णे ए' (का०व्या०१/१/२) सूत्रतः 'अवर्णः', 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या०१/२/१) इति सूत्रात् 'परश्च लोपम्' इति अनुवर्तते । अत एव सूत्रार्थो भवति- अवर्णात् उवर्णे ऊवर्णे वा परे एकारो भवति परश्च लोपमापद्यते । यथा- तवोहनम् इत्यत्र तव + उहनम् इति स्थिते वकारोत्तरवर्ती अकारेण सह उहनं शब्दस्य उकारं समेत्य वकारोत्तरवर्ती अकारस्य ओकारो भवति परस्य उकारस्य च लोपो भवति। अनुरूपेण गङ्गा + उदकम् = गङ्गोदकम् इति रूपं सिध्यति ।

कातन्त्रकारेण तवर्कारः सर्कारेण प्रभृतिपदानां कृते 'ऋवर्णे अर्' (का०व्या०१/२/४) इति तृतीयसूत्रं कृतम् । अस्मिन्

[2] 'अदेङ् गुणः'(अ०१/१/२) इति सूत्रस्य काशिकावृत्तिः।

[3] 'उरण् रपरः'(अ०१/१/५१) सूत्रस्य बालमनोरमा टीका।

[4] 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य दुर्गवृत्तिः।

[5] 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य विवरणपञ्जी।

[6] 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य दुर्गवृत्तिः।

[7] 'मनसः सकारलोपः कथं स्यात् नकारस्याकारलोपे सति संयोगान्तलक्षण इति चेन्न, सकारेण व्यवधानादकारस्यैव लोपः कथं स्यात् ? सत्यम् अत एव चकारस्यानुक्तसमुच्चयार्थत्वात् लोकोपचाराद्वा सकारस्यापि लोप इति।' 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) इति सूत्रस्य विवरणपञ्जी

सूत्रे पूर्ववर्ती 'अवर्ण इवर्णे ए'(का०व्या०१/२/२) सूत्रतः 'अवर्णः', 'समानः सवर्णे दीर्घीभवति परश्च लोपम्'(का०व्या०१/२/१) इति सूत्रात् 'परश्च लोपम्' इति अनुवर्तते। अतः सूत्रस्य अर्थो भवति- अवर्णात् ऋवर्णे परे ऋकारो भवति परश्च लोपमापद्यते । तव + ऋकार इति स्थिते सन्धिकार्ये वकारोत्तरवर्ती अकारस्य ऋकारो भवति परस्य ऋकारस्य च लोपे तवर्कार इति पदं सिध्यति । अनुरूपेण सा +ऋकारेण = सर्कारेण इति रूपं सिध्यति ।

प्रार्च्छति इति पदस्य कृते वृत्तिकारेण उक्तम्- 'ऋति धातोरुपसर्गस्य दीर्घः'[8] इत्यनेन धातोः ऋकारे उपसर्गस्य योऽरादेशस्तस्य दीर्घो भवति परश्च लोपमापद्यते। प्रार्षभीयतीति पदस्य कृते वृत्तिकारेणोक्तम्- 'नामधातोर्वा' ।[9] इत्यनेन नामधातोरृऋकारे उपसर्गस्य योऽरादेशस्तस्य वैकल्पिके दीर्घो भवति परश्च लोपमापद्यते। पक्षे 'ऋवर्णे अर्' (का०व्या०१/२/४) इत्यनेन प्रर्षभीयतीति रूपमपि भवति।

कातन्त्रकारेण तवल्कारेण सल्कारेण प्रभृतिपदानि साधनार्थं 'लृवर्णे अल्' (का०व्या०१/२/५) इति चतुर्थसूत्रं कृतम्। अत्रापि 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या०१/२/१) इति सूत्रात् 'परश्च लोपम्' इति अनुवर्तते। अत एव सूत्रस्य अर्थो भवति- अवर्णात् लृवर्णे परे ऋकारो भवति परश्च लोपमापद्यते। तवल्कारेण इत्यत्र तव + लृकारेण इति स्थिते वकारोत्तरवर्ती अकारस्य लृकारो भवति परस्य लृकारस्य च लोपो भवति । उपाल्कारीयतीति पदस्य कृते वृत्तिकारेण उक्तम्- 'उपसर्गस्य वा लृति धातोरलो दीर्घः'[10] इत्यनेन नामधातोः लृकारे परे उपसर्गस्य योऽलादेशस्तस्य वैकल्पिके दीर्घो भवति परश्च लोपमापद्यते। पक्षे 'लवर्णे अल्' (का०व्या०१/२/५) इत्यनेन उपल्कायतीति रूपमपि भवति। अतः पाणिनीयव्याकरणे रमेशः, गङ्गोदकम्, कृष्णर्द्धिः, तवल्कारः प्रभृतीनां पदानां कृते 'आद् गुणः'(अ०६/१/८७) इति सूत्रं कृतम्। अपि च 'एकः पूर्वपरयोः' (अ०६/१/४१) 'अदेङ्गुणः' (अ०१/१/८७) इति सूत्रद्वयं 'आद् गुणः' (अ०६/१/८७) इति सूत्रस्य अर्थबोधार्थं प्रयोजनमस्ति। स्थानप्रयत्नविचारार्थं 'स्थानेऽन्तरतमः' (अ०१/१/५०) सूत्रस्य प्रयोजनमस्ति। अपि च कृष्णर्द्धिः, तवल्कारः पदयोः कृते 'उरण्रपरः' (अ०१/१/५१) इति सूत्रस्यापि प्रयोजनमस्ति । अस्मिन् विषये कातन्त्रव्याकरणे पृथक् चत्वारि सूत्राणि कृतानि । अपि च पूर्ववर्णस्य लोपस्य कृते पूर्वसूत्रात्[11] 'परश्च लोपम्' इति अनुवृत्तं कृतम्। पाणिनीयव्याकरणे गुणसंज्ञा[12], प्रत्याहासंज्ञा[13] कृता तदन्तरं प्रयोगविषये सूत्रं कृतम् । परन्तु कातन्त्रव्याकरणे पृथक् गुणादि संज्ञा न कृता, केवलं प्रयोगसूत्रेण उद्देश्यं साधितम्।

**वृद्धिरेकादेशः**

वृद्धिरेकदेशो विषये श्रीमत्पाणिनिमुनिना सूत्रं प्रणीतम्- 'वृद्धिरेचि'(अ०६/१/८८) । वृद्धिः प्रथमान्तम्, एचि सप्तम्यन्तम्, द्विपदमिदमं सूत्रम्। 'आद्गुणः' (अ०६/१/८७) इति सूत्रात् 'आत्' इति पदम्, 'संहितायाम्' (अ०६/१/७२) इति सूत्रमनुवर्तते। अपि च 'एकः पूर्वपरयोः' (अ०६/१/८४) इत्यधिकृतम्। अतः सूत्रार्थो भवति- आदेचि परे वृद्धिरेकादेशः स्यात्। सूत्रमिदम् 'आद्गुणः' (अ०६/१/८७) सूत्रस्यापवादम्। उदाहरणं यथा- कृष्णैकत्वम् इत्यत्र कृष्ण + एकत्वम् इति स्थिते 'वृद्धिरादैच्' (अ०६/१/८८) 'स्थानेऽन्तरतमः' (अ०१/१/५०) इतिसूत्रद्वयसहकारेण 'वृद्धिरेचि' (अ०६/१/८८) इत्यनेन पूर्वपरयोर्वृद्धिरेकादेशे औकारे कृष्णैकत्वमिति रूपं सिद्ध्यति । तदेव गङ्गा + ओघः = गङ्गौघः, देव + ऐश्वर्यम् = देवैश्वर्यम् रूपं सिध्यति । वृद्धिरेकादेशो विषये द्वितीयसूत्रं प्रणीतम्-'एत्येधत्यूठ्सु' (अ०६/१/८९) । एतिश्च, एधतिश्च, ऊठ् च तेषाम् इतरेतरयोगद्वन्द्वः, एत्येधत्यूठः, तेषु एत्येधत्यूठ्सु सप्तम्यन्तम् एकपदं सूत्रमिदम्। 'आद्गुणः' (अ०६/१/८७) इति सूत्रात् 'आत्' इति पदम्, 'वृद्धिरेचि' (अ०६/१/८८) सूत्रात् 'एचि' इति पदं 'संहितायाम्' (अ०६/१/७२) इति सूत्रमनुवर्तते। अपि च 'एकः पूर्वपरयोः' (अ०६/१/८४) इत्यधिकृतम्। 'यस्मिन्विधिस्तदादावल्ग्रहणे'[14] इत्यनेन तदादिविधिर्भवतीति।[15] सूत्रार्थो भवति- अवर्णात् एजाद्योः एत्येधत्योः ऊठि च परे पूर्वपरयोः स्थाने वृद्धिरादेशो भवतीति। उदाहरणं यथा- उपैति इत्यत्र उप

---

8 ' ऋवर्णे अर्'(का०व्या०१/२/४) सूत्रस्य दुर्गवृत्तिः।

9 तदेव

10'लृवर्णे अल्'(का०व्या०१/२/५) सूत्रस्य दुर्गवृत्तिः।

11 'समानः सवर्णे दीघीर्भवति परश्च लोपम्'(का०व्या०१/२/१)

12'अदेङ्गुणः' (अ०१/१/८७)

13 ' आदिरन्त्येन सहेता'(अ०१/१/७१)

14 परिभाषेन्दुशेखरः,परिभाषा ३३।

15'यस्मिन्विधिः' इति तदादिग्रहणम्, एजादाविति लभ्यते, तच्च एत्येधत्योरेव विशेषणम्, न तु ऊठः, असंभावात्। अ०६/१/८९ सूत्रस्य बालमनोरमा टीका

+ एति इति स्थिते 'एङि पररूपम्' (अ०६/१/९४) इत्यनेन पररूपे प्राप्ते 'एत्येधत्यूठ्सु' (अ०६/१/८९) इत्यनेन वृद्धिर्विधीयते, 'स्थानेऽन्तरतमः' (अ०१/१/५०) इत्यनेन कन्ठतालुस्थानजनकत्वधर्मेण अन्तरतम ऐकारो भवति । एवम् उप + एधते = उपैधते इति रूपं सिद्ध्यति । प्रष्ठौहः इत्यत्र प्रष्ठ + ऊह इति स्थिते अवर्णात् ऊठि परे पूर्वपरयोः स्थाने 'आद्गुणः' (अ०६/१/८७) इत्यनेन गुणः प्रसज्यते, गुणं बाधित्वा 'एत्येधत्यूठ्सु' (अ०६/१/८९) इत्यनेन पूर्वपरयोर्वृद्धिरेकादेशे ऐकारो भवति।

वृद्धिरेकादेशो विषये पाणिनिमुनिना प्रणीतमपरं सूत्रम्- 'उपसर्गादृति धातौ' (अ०६/१/९२) । अत्र उपसर्गात् पञ्चम्यन्तम्, ऋति सप्तम्यन्तम्, धातौ सप्तम्यन्तं त्रिपदमिदं सूत्रम्। "उपसर्गविशेषणम्, अतस्तदन्तविधिः - अरान्तादिति लभ्यते । ऋतीति धातोर्विशेषणम् । यस्मिन्विधिरिति तदादिविधिः । अकारादविति लभ्यते।"[16] अत सूत्रार्थो भवति- अवर्णान्तादुपसर्गादृकारादौ धातौ परे पूर्वपरयोः स्थाने वृद्धिरेकादेशः स्यात् । उदाहरणम्- प्रार्च्छति, उपार्च्छति इत्यत्र प्र + ऋच्छति, उप +ऋच्छति इत्यवस्थायां 'आद्गुणः' (अ०६/१/८७) इत्यनेन गुणे प्राप्ते 'उपसर्गादृति धातौ' (अ०६/१/९२) इत्यनेन पूर्वपरयोर्वृद्धिरेकादेशे आकारे 'उरण् रपरः' (अ०१/१/५१) इत्यनेन रपरत्वे वृद्धिरेव विधीयते ।

वृद्धिरेकादेशविषये अपरं सूत्रम् -'वा सुप्यापिशलेः' (अ०६/१/९२)। 'वा' अव्ययम्, 'सुपि' सप्तम्यन्तम्, 'आपिशलेः' षष्ठ्यन्तम् । 'आद्गुणः' (अ०६/१/८७) इत्यतः 'आत्', 'वृद्धिरेचि' (अ०६/१/८८) इत्यतः 'वृद्धिः', 'उपसर्गादृति धातौ' (अ०६/१/९२) इति पूर्वसूत्रं चानुवर्तते। 'एकः पूर्वपरयोः' (अ०६/१/४१) चाधिकृतम् । अस्मिन् सूत्रे 'येन विधिस्तदन्तस्य' (अ०१/१/७२) इत्यनेन तदन्तविधिर्भवति।[17] अतः सूत्रस्यार्थो भवति- अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे पूर्वपरयोः स्थाने वृद्धिरेकादेशो वा भवति। उदाहरणं यथा- प्र + ऋषभीयति इत्यत्र 'वा सुप्यापिशलेः' (अ०६/१/९२) इत्यनेन वैकल्पिके पूर्वपरयोर्वृद्धिरेकादेशे आकारे 'उरण् रपरः' (अ०१/१/५१) इत्यनेन रपरत्वे प्रार्षभीयतीति, वृद्ध्यभावपक्षे तु प्र + ऋषभीयति इत्यत्र 'आद्गुणः' (अ०६/१/८७) इत्यनेन पूर्वपरयोर्गुणैकादेशे अकारे 'उरण् रपरः' (अ०१/१/५१) इत्यनेन रपरत्वे प्रर्षभीयतीति रूपं सिद्धम्। उप + लृकारीयति इत्यत्र 'वा सुप्यापिशलेः' (अ०६/१/९२) इत्यनेन वैकल्पिके पूर्वपरयोर्वृद्धिरेकादेशे आकारे 'उरण् रपरः' (अ०१/१/५१) इत्यनेन रपरत्वे आन्तरतम्याद् लकारे उपाल्कारीयति, वृद्ध्यभावपक्षे तु 'आद्गुणः' (अ०६/१/८७) इत्यनेन पूर्वपरयोर्गुणैकादेशे अकारे 'उरण् रपरः' (अ०१/१/५१) इत्यनेन रपरत्वे लकारे उपल्कारीयतीति रूपं सिद्धम् ।

कातन्त्रव्याकरणे अस्मिन् विषये पृथक् सूत्रद्वयं कृतम्। प्रथमसूत्रं 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) । अस्मिन् सूत्रे 'अवर्ण इवर्णे ए' (का०व्या०१/२/२) इत्यतः 'अवर्णः', 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या०१/२/१) इत्यतः 'परश्च लोपम्' इति अनुवर्तते। अतः सूत्रार्थो भवति- अवर्णात् एकारे ऐकारे च परे ऐकारो भवति परश्च लोपमापद्यते । यथा- तव + एषा इत्यत्र वकारोत्तरवर्ती अकारेण सह एकारं समेत्य वकारोत्तरवर्ती अकारस्य ऐकारो भवति एषा इति पदस्य एकारस्य च लोपो भवति। अनुरूपेण सा + ऐन्द्री = सैन्द्री इति रूपं सिद्ध्यति ।

द्वितीयसूत्रम्- 'ओकारे औ औकारे च'(का०व्या०१/२/७) । अस्मिन् सूत्रे 'अवर्ण इवर्णे ए' (का०व्या०१/२/२) इत्यतः 'अवर्णः', 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या०१/२/१) इत्यतः 'परश्च लोपम्' इति अनुवर्तते । अतः सूत्रार्थो भवति- अवर्णात् ओकारे औकारे च परे औकारो भवति परश्च लोपमापद्यते । यथा- तव + ओदनम् इत्यत्र वकारोत्तरवर्ती अकारेण सह ओदनमिति ओकारं समेत्य वकारोत्तरवर्ती अकारस्य औकारो भवति परस्य ओकारस्य च लोपो भवति । अनुरूपेण सा + औपगवी = सौपगवी इति रूपं सिध्यति ।

सूत्रे चकाराधिकारवलात् उपसर्गसम्बन्धिनोऽवर्णस्य लोपो भवति धातोरेदोतोः परयोः।[18] यथा- प्र+ एलयति इत्यत्र 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) इत्यनेन ऐकारप्राप्तं बाधित्वा चकाराधिकारवलात् एलयतीति धातोरेकारे परे प्र-उपसर्गस्य अकारस्य लोपे प्रेलयतीति रूपं सिध्यति । प्र+ओखति इत्यत्र 'ओकारे औ औकारे च' (का०व्या०१/२/७) इत्यनेन ओकारे प्राप्ते

16 'उपसर्गादृति धातौ'(अ०६/१/९१) सूत्रस्य बालमनोरमा टीका।

17 ' आदित्यनेन उपसर्गादिति विशेष्यत इति तदन्तविधिः'। (अ०६/१/९२ सूत्रस्य बालमनोरमा टीका)

18'चकाराधिकारादुपसर्गावर्णलोपो धातोरेदोतोः' (का०व्या०१/२/७ सूत्रस्य दुर्गवृत्तिः)

चकाराधिकारवलात् तं बाधित्वा ओखतीति धातोरेकारे परे प्र-उपसर्गस्य अकारस्य लोपे प्रोखतीति रूपं सिध्यति । परन्तु उप + एति , उप + एधते इत्यत्र 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) इत्यनेन ऐकारप्राप्तं बाधित्वा चकाराधिकारवलात् एति-एधति-धातोरेकारयोः परयोः प्र-उपसर्गस्य अकारस्य लोपे उपैति उपैधते इत्येतेषां रूपाणां सिद्धिर्न भवति । परन्तु उपसर्गसम्बधिनोऽवर्णस्य लोपो न भवति इणेधत्योः सम्बधिनि एकारे परे।[19] अतः उप + एति, उप + एधते इत्यत्र 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) इत्यनेन पकारोत्तरवर्ती अकारेण सह एकारं समेत्य वकारोत्तरवर्ती अकारस्य ऐकारो भवति परस्य एकारस्य च लोपे उपैति उपैधते इति रूपं सिध्यति ।

उपसर्गसम्बन्धिनोऽवर्णस्य लोपो भवति वा, नामधातोरेदोतोः परयोः ।[20] उदाहरणं यथा- उप + एकीयति इत्यत्र पकारोत्तरवर्ती उपसर्गसम्बन्धिनोऽवर्णस्य वैकल्पिके लोपे उपेकीयति इति रूपं सिद्धम् । पक्षे तु उप + एकीयति इत्यत्र 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) इत्यनेन पकारोत्तरवर्ती अकारेण सह एकारं समेत्य वकारोत्तरवर्ती अकारस्थाने ऐकारो भवति परस्य एकारस्य लोपे उपैकीयति इति रूपं सिद्ध्यति । अपि च प्र + ओषधीयति इत्यत्र पकारोत्तरवर्ती उपसर्गसम्बन्धिनोऽवर्णस्य वैकल्पिके लोपे प्रोषधीयतीति रूपं सिद्धम् । पक्षे तु प्र + ओषधीयति इत्यत्र 'ओकारे औ औकारे च' (का०व्या०१/२/७) इत्यनेन पकारोत्तरवर्ती अकारेण सह ओकारं समेत्य वकारोत्तरवर्ती अकारस्थाने औकारो भवति परस्य ओकारस्य लोपे प्रौषधीयतीति रूपं सिध्यति ।

अतः कृष्णैकत्वम्, देवैश्वर्यम् इति पदानां कृते पाणिनिव्याकरणे सूत्रं कृतम्- 'वृद्धिरेचि' (अ०६/१/८८) । परन्तु कातन्त्रव्याकरणे सारल्यार्थं अस्मिन् विषये पृथक् 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६), 'ओकारे औ औकारे च' (का०व्या०१/२/७) इति सूत्रद्वयं कृतम्। उपैति, उपैधते इति पदस्य कृते -'एत्येधत्यूठ्सु' (अ०६/१/८९) पाणिनिमुनिना कृता । किन्तु कातन्त्रकारेण 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) इति सूत्रानुसारेण पद्वदयं समर्थितम् । प्राच्र्छति, उपाच्र्छति पदानां कृते पाणिनिव्याकरणे 'उपसर्गादृति धातौ' (अ०६/१/९२) इति सूत्रं कृतम् । अस्मिन् विषये कातन्त्रव्याकरणे सूत्रं नोपलभ्यते, परन्तु उक्तरूपाणां सिद्ध्यर्थं वृत्तिकारेण 'ऋति धातोरुपसर्गस्य,'[21] इति वृत्तिः कृता। प्रार्षभीयति, उपाल्कारीयति पदानां कृते पाणिनिव्याकरणे -'वा सुप्यापिशलेः' (अ०६/१/९२) इति सूत्रमुपलभ्यते । कातन्त्रव्याकरणे अस्मिन् विषये पृथक् सूत्रं नोपलभ्यते, परन्तु वृत्तिकारेण 'नामधातोर्वा,'[22] 'उपसर्गस्य वा लृति धातोरलो दीर्घः'[23] इति वृत्तिद्वयं कृतम् ।

**पररूपैकादेशः**

पररूपसन्धिविधायकं सूत्रम्- 'एङि पररूपम्' (अ०६/१/९४)। एङि सप्तम्यन्तं, पररूपं प्रथमान्तं, द्विपदमिदं सूत्रम्। 'आद्गुणः' (अ०६/१/८७) इत्यतः 'आत्', 'उपसर्गादृति धातौ' (अ०६/१/९२) इत्यतः उपसर्गात् धातौ चानुवर्तते । आद् इति विशेषणं उपसर्गात् इति विशेष्यम्। अतः तदन्तविधिना अवर्णान्तात् उपसर्गाद् इति अर्थो भवति। एङि धातौ इति सप्तम्यन्तं पदद्वयमस्ति । अतः तदादिविधिना एङादिधातौ इति अर्थो भवति । अतः सम्पूर्णसूत्रार्थो भवति- अवर्णान्तादुपसर्गादेङादौ धातौ परे पूर्वपरयोः पररूपैकादेशः स्यात् । यथा-प्र + एजते इत्यत्र 'वृद्धिरेचि' (अ०६/१/८८) इत्यनेन वृद्धिं बाधित्वा 'एङि पररूपम्' (अ०६/१/९४) इत्यनेन पूर्वपरयोः पररूपैकादेशे एकारे प्रेजते इति रूपं सिद्ध्यति । अनुरूपेण उप + ओषति = उपोषतीति रूपं सिध्यति।

'एङि पररूपम्' (अ०६/१/९४) इत्यत्र 'वा सुप्यापिशलेः' (अ०६/१/९२) सूत्रतः 'वा सुपि' इत्यनुवर्तते । तच्च नैकवाक्यतया सम्बध्यते । अत्र वाक्यद्वयमस्ति। अतः वाक्यभेदेन व्याख्येयम् । प्रथमवाक्यं एङि पररूपमिति। प्रथमवाक्येन प्रेजते आदि रूपं सिद्ध्यति । वा सुपीति द्वितीयं वाक्यम् । तत्र एङि पररूपमित्यनुवर्तते । अतः अवर्णान्तादुपसर्गादेङादौ सुब्धातौ परे पूर्वपरयोः स्थाने पररूपैकादेशो वा स्यादित्येवार्थः । उदाहरणं यथा- उप + एडकीयतीत्यत्र 'एङि पररूपम्'(अ०६/१/९४) इत्यनेन नित्यमेव प्राप्ते 'वा सुप्यापिशलेः' (अ०६/१/९२) इत्यनुवर्त्य वाक्यभेदेन वैकल्पिके पूर्वपरयोः पररूपैकादेशे एकारे उपेडकीयतीति, पररूपैकादेशाभावे तु 'वृद्धिरेचि' (अ०६/१/८८) इत्यनेन वृद्धौ उपैडकीयतीति रूपद्वयं सिध्यति।

'शकन्ध्वादिषु पररूपं वाच्यम्'[24] वार्तिकार्थः- अचि परे शकन्ध्वादिविषये टेः पररूपैकादेशो भवति । यथा-

---

[19]'इणेधत्योर्न' (का०व्या०१/२/७) सूत्रस्य दुर्गवृत्तिः ।

[20]'नामधातोर्वा' (का०व्या०१/२/७) सूत्रस्य दुर्गवृत्तिः।

[21] ' ऋवर्णे अर्'(का०व्या०१/२/४) सूत्रस्य दुर्गवृत्तिः।

[22]तदेव

[23]'लृवर्णे अल्'(का०व्या० १/२/५) सूत्रस्य दुर्गवृत्तिः।

[24]अ०१/१/६४ सूत्रस्य वार्तिकम्।

शकानां देशविशेषाणाम् अन्धुः कूप इति विग्रहे शक + अन्धु इति स्थिते ककारोत्तरवर्ती अकारोऽचोऽव्यवहितपूर्वोऽस्ति । अतो शक इत्यस्य अकारः टिसंज्ञकः[25]। अतो वार्तिकेन प्राप्तं सवर्णदीर्घं बाधित्वा पूर्वपरयोः पररूपैकादेशे अकारे शकन्धुरिति रूपं सिध्यति। एवमेव कर्कन्धुः, कुलटा, हलीषा, लाङ्गुलीषा प्रभृतिरूपाणि सिध्यति। मनस् ईषा इत्यत्र मनस् शब्दस्य अस् टिसंज्ञकोऽस्ति। तस्य पररूपे कृते मन् ईषा इति जायते। वर्णमेलनेन मनीषा इति रूपं निष्पद्यते ।

अतः प्रेजते, उपोषति इति पदानां कृते 'एङि पररूपम्' (अ०६/१/९४) इति सूत्रमुपलभ्यते। अस्मिन् विषये कातन्त्रव्याकरणे पृथक् सूत्रं न दृश्यते। परन्तु 'एकारे ऐ ऐकारे च' (का०व्या०१/२/६) इति सूत्रे चकाराधिकारवलात् उपसर्गसम्बन्धिनोऽवर्णस्य लोपो भवति धातोरेदोतोः परयोः[26] । इत्यनेन सिध्यति। अपि च पाणिनिव्याकरणे 'एङि पररूपम्' (अ०६/१/९४) सूत्रे 'वा सुप्यापिशलेः' (अ०६/१/९२) इत्यनुवर्त्य वाक्यभेदेन वैकल्पिके पूर्वपरयोः पररूपैकादेशे उपेडकीयति रूपं सिद्ध्यति। कातन्त्रव्याकरणानुसारे 'नामधातोर्वा'[27] इत्यनेन वैकल्पिके उपेडकीयति रूपं सिध्यति । अतः कातन्त्रव्याकरणे स्वल्पसंख्यकसूत्रेण कार्यं साधितम् ।

पाणिनीयव्याकरणे शकन्धुः, कर्कन्धुः, कुलटा, हलीषा, लाङ्गुलीषा, मनीसा प्रभृतिपदानां कृते ' अचोऽन्त्यादि टि' (अ०१/१/६४) इतिसूत्रसहकारेण 'शकन्ध्वादिषु पररूपं वाच्यम्'[28] इत्यनेन वार्तिकेन उक्तरूपं सिद्धम् । अस्मिन् विषये कातन्त्रव्याकरणे 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या०१/२/१) सूत्रात् 'अवर्ण इवर्णे ए' (का०व्या०१/२/२) इति सूत्रे चकाराधिकारात्[29] तेन क्वचित् पूर्वोऽकारस्य लोपे उक्तरूपाणि सिध्यति । मनस् + ईषा इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् लोकोपचाराद्वा सकारस्य लोपे मनीषा इति पदं सिध्यति ।

## दीर्घैकादेशः

'अकः सवर्णे दीर्घः' (अ०६/१/१०१) दीर्घ एकादेशविधायकं सूत्रमिदम् । अकः पञ्चम्यन्तम्, सवर्णे सप्तम्यन्तं,दीर्घः प्रथमान्तं द्विपदमिदं सूत्रम् । 'इको यणचि' (अ०६/१/७७) इत्यतः 'अचि' इत्यनुवर्तते । एकः पूर्वपरयोः (अ०६/१/८४) इत्यधिकृतम्। अतः सूत्रशरीरं भवति-'अकः सवर्णे अचि दीर्घ एकः पूर्वपरयोः' इति । सूत्रार्थो भवति – अकः सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घ एकादेशः स्यात् । यथा- दैत्यारिः। दैत्यानामरिरिति विग्रहे , समासे दैत्य + अरिरिति स्थिते 'अकः सवर्णे दीर्घः' (अ०६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णे दीर्घे आकारे 'दैत्यारिः' इति रूपं सिध्यति । श्रीशः । श्रीः ईश इति विग्रहे, समासे श्री + ईश इति स्थिते 'अकः सवर्णे दीर्घः' (अ०६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णे दीर्घे ईकारे श्रीश इति रूपं सिध्यति। विष्णूदयः । विष्णोः उदय इति विग्रहे समासे विष्णु + उदय इति स्थिते 'अकः सवर्णे दीर्घः' (अ०६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णे दीर्घे ऊकारे विष्णूदय इति रूपं सिध्यति ।

कातन्त्रव्याकरेण अस्मिन् विषये सूत्रं कृतम्- 'समानः सवर्णे दीर्घीभवति परश्च लोपम्' (का०व्या० १/२/१) । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ एते दश समाना वर्णाः[30], एतेषामेव द्वौ द्वौ वर्णौ सवर्णसंज्ञकौ भवतः[31] । अतः सूत्रस्यार्थो भवति- समानसंज्ञको वर्णः सवर्णे परे दीर्घीभवति परश्च लोपमापद्यते[32] । उदाहरणं यथा- दण्डाग्रम्। दण्ड + अग्रमिति स्थिते डकारोत्तरवर्ती अकारः समानसंज्ञको वर्णः, अग्रमित्यस्य आद्यकारः सवर्णसंज्ञको वर्णः । अथः सवर्णे परे दीर्घे आकारे परश्च लोपे दण्डाग्रमिति रूपं सिद्ध्यति । एवमेव सा + आगता = सागता, दधि + इदम् = दधीदम्, नदी + ईहते = नदीहते, मधु + उदकम् = मधूदकम्, वधू + ऊढम् = वधूढम्, पितृ + ऋषभः = पितृषभः, कृ + ऋकारः = कृकारः, कॢ + ऌकारः = कॢकारेण प्रभृतिरूपाणि सिध्यति ।

अतः पाणिनिकातन्त्रव्याकरणयोः दीर्घ आदेशः कृतः । परन्तु पाणिनीयव्याकरणे 'एकः पूर्वपरयोः' (अ०६/१/८४) इत्यनेन उभयो वर्णयोः स्थाने दीर्घ एकादेशः कृतः । कातन्त्रव्याकरणे परवर्णस्य लोपः कृत्वा पूर्ववर्णस्य स्थाने आदेशः कृतः, अतः एकस्य वर्णस्य स्थाने एकमेव दीर्घादेशः कृतः ।

## पूर्वरूपैकादेशः

'एङः पदान्तादति' (अ०६/१/१०९) एङि पञ्चम्यन्तम्, पररूपं पञ्चम्यन्तम्, अति सप्तम्यन्तं त्रिपदमिदं सूत्रम् ।

---

25' अचोऽन्त्यादि टि'(अ०१/१/६४)

26'चकाराधिकारादुपसर्गावर्णलोपो धातोरेदोतोः' (का०व्या०१/२/७ सूत्रस्य दुर्गवृत्तिः)

27'ओकारे औ औकारे च' (का०व्या०१/२/७ ) सूत्रस्य दुर्गवृत्तिः।

28 अ०१/१/६४ सूत्रस्य वार्तिकम्।

29"चकाराधिकारोऽनुक्तसमुच्चयार्थः, तेन क्वचित् पूर्वोऽपि लुप्यते।"(का०व्या०१/२/२ सूत्रस्य दुर्गवृत्तिः)

30 ' दश समानाः'(का०व्या०१/१/३)

31 तेषां द्वौ द्वावन्योऽन्यस्य सवर्णौ(का०व्या०१/१/४)

32 'समानः सवर्णे दीर्घीभवति परश्च लोपम्'(का०व्या०१/२/१) इति सूत्रस्य दुर्गवृत्तिः।

आलोच्यसूत्रे 'अमि पूर्वः'(६/१/१०७) सूत्रतः 'पूर्वः' इत्यनुवर्तते। 'एकः पूर्वपरयोः (अ०६/१/८४) इत्यधिकृतम् । अतः सूत्रार्थो भवति- पदान्तादेङोऽति परे पूर्वपरयोः स्थाने पररूपैकादेशो भवति । यथा- हरेऽव। इरे + अव इत्यत्र 'एचोऽयवायावः' (अ०६/१/७८) इत्यनेन प्राप्तम् अयादेशं बाधित्वा 'एङः पदान्तादति' (अ०६/१/१०९) इत्यनेन पूर्वपरयोः पूर्वरूपैकादेशे एकारे हरेऽव इति रूपं सिध्यति। विष्णोऽव। विष्णो + अव इत्यत्र 'एचोऽयवायावः' (६/१/७८) इत्यनेन प्राप्तम् अयादेशं बाधित्वा 'एङः पदान्तादति' (अ०६/१/१०९) इत्यनेन पूर्वपरयोः पूर्वरूपैकादेशे ओकारे विष्णोऽव इति रूपं सिध्यति।

अस्मिन् विषये कातन्त्रकारेण सूत्रं कृतम्- 'एदोत्परः पदान्ते लोपमकारः' (का०व्या०१/२/१७)। सूत्रार्थो भवति- एदोद्भ्यां परोऽकारः पदान्ते वर्त्तमानो लोपमापद्यते । उदाहरणं यथा- ते + अत्र इति स्थिते 'ते' इत्यस्य पदान्तादेकाराद् परस्य 'अत्र' इत्यस्य अकारस्य लोपे तेऽत्र इति रूपं सिध्यति। एवमेव पटो + अत्र = पटोऽत्र रूपं भवति । सूत्रे एदोद्भ्यामिति किं? "एदोत्। एच्च ओच्च एदोतौ ताभ्यां पर इति पञ्चमीलक्षणस्तत्पुरुषोऽयम्, नचैदोतौ परौ यस्मादिति वहुव्रीहिः एकारे ओकारे चैकारस्यौकारस्य च विषयात्। नच पदमध्ये तौ असन्ध्यक्षरयोरस्य तौ तल्लोपश्चेति वचनात् ।"[33]

अतः हरेऽव, विष्णोऽव इति पदस्य कृते पाणिनीयव्याकरणे 'एङः पदान्तादति' (अ०६/१/१०९) इति सूत्रं कृतम्। अत उभयो वर्णयोः स्थाने पूर्वरूपैकादेशः कृतः, पूर्वरूपैकादेशेन अकारः नोपलभ्यते अकारोऽवबोधार्थं 'ऽ' चिह्नं व्यवहारः दृश्यते। कातन्त्रव्याकरणे पूर्वरूपैकादेशः न कृतः, केवलं परवर्णस्य लोपः कृतः । लुप्ताकारस्य अवबोधार्थं 'ऽ' चिह्नं व्यवहारं कृतम् । अत उभयो वर्णयोः स्थाने एकमेव आदेशोऽपेक्षा परवर्णस्य लोपोऽधिकं समीचीनम् ।

## निष्कर्षः

शब्दस्य साधुत्वविषये उभयोः व्याकरणयोरवदानमतुलनीयम् । पाणिनीयव्याकरणे पूर्वे गुणवृद्ध्यादि कृत्रिमसंज्ञासूत्रं कृतम् । तदन्तरं गुणवृद्ध्यादि प्रयोगसूत्रं कृतम् । अतः पाणिनीयव्याकरणे सूत्रसंख्यापि अधिकं वर्तते । कातन्त्रव्याकरणे कृत्रिमसंज्ञासूत्रं विहाय केवलं प्रयोगसूत्रेण शब्दस्य साधुत्वविधानं कृतम् । अतः कातन्त्रव्याकरणे सूत्रसंख्यापि स्वल्पं वर्तते । पाणिनीयव्याकरणे अच्, एङ्, ऐच् प्रभृतयः प्रत्याहारप्रयोगेण शब्दलाघवः कृतः । परन्तु अर्थबोधे क्लेशो भवति । कातन्त्रकारेण सूत्रे प्रत्यक्षभावे ए, ऐ, ओ, औ प्रभृतयो वर्णप्रयोगेण अर्थलाघवः कृतः । पाणिनिमुनिना गुणाद्येकादेशविषये उभयोः वर्णयोः स्थाने एको वर्ण आदेशः कृतः । कातन्त्रकारेण पूर्ववर्णे आदेशः परवर्णस्य लोपो विधीयते ।

[33] 'एदोत्परः पदान्ते लोपमकारः'(का०व्या०१/२/१७) इति सूत्रस्य दुर्गटीका।

## सन्दर्भग्रन्थाः


1. अष्टाध्यायी (चन्द्रलेखा-हिन्दीव्यख्या सहिता) । सम्पादकः इश्वरचन्द्र। दिल्ली : चौखम्बा संस्कृत प्रतिष्टान, प्रथमभागः द्वितीयभागश्च २०१७।
2. कलापव्याकरणम् (सन्धिवृत्ति) । सम्पादकः सीतानाथसिद्धान्तवागीश भट्टाचार्य । कलकाता : संस्कृत साहित्यपरिषद् , चतुर्थसंस्करणम् १९३५ ।
3. कातन्त्रव्याकरणम् । सम्पादकः हरिनारायण तिवारी । वाराणसी : चौखम्बा संस्कृत सीरीज आफिस,२०१६ ।
4. कातन्त्रव्याकरणम् (कलापवृत्ति-कातन्त्रपञ्जिका-कलापचन्द्रटीका सहिता)। सम्पादः जानकीप्रसाद द्विवेदी । वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, प्रथमभागः १९९७ ।
5. काशिका (न्यास-पदमञ्जरी-भावबोधिनी सहिता) । सम्पादकौ जयशङ्करलाल त्रिपाठी, सुधाकरमालवीय च । वाराणसी : तारा बुक एजेन्सी, सप्तमभागः २०१२ ।
6. परिभाषेन्दुशेखरः (सुबोधिनी-हिन्दीव्याख्योपेतः) । सम्पादकः विश्वनाथ मिश्र। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१६ ।
7. लघुसिद्धान्तकौमुदी (भैमिव्याख्या सहिता) । सम्पादकः भीमसेन शास्त्री । दिल्ली : भैमी प्रकाशन, प्रथमभागः २०१९(दशमसंस्करणम्) ।
8. व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्द्योतसमुल्लसितम्)। सम्पादकः भार्गव शास्त्री भिकाजी जोशी। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, पञ्चमभागः २०१४ ।
9. वैयाकरणसिद्धान्तकौमुदी (सन्धिप्रकरणम्)। सम्पादकः, करुणासिन्धु दास। कलकाता : संस्कृत पुस्तक भाण्डार, २००४ ।
10. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-दीपिका-संस्कृतहिन्दीव्याख्योपेतम्)। सम्पादकः गोपालदत्त पाण्डेय। वाराणसी : चौखम्बा सुरभारती प्रकाशन, प्रथमभागः २०१७।

11. वैयाकरणसिद्धान्तकौमुदी (अच्सन्धिप्रकरणम्)। सम्पादकः विश्वरञ्जन पाण्डा। कलकाता : संस्कृत वुक डिपो,२०१८।
12. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी-सहिता)। सम्पादकौ गिरिधर शर्मा परमेश्वरानन्द च। दिल्ली : मोतिलाल बनाररसीदास, प्रथमभागः २०१०।
13. Pāṇini. The Ashṭādhyāyī of Pāṇini. ed. by Śrīśa Chandra Vasu. Delhi: Motilal Banarsidass, Print 1891, I.